M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 575

Title: Tarkaprakashika

575

तर्कप्रकाशिका || Incomplete

Tarka Prakāshikā	Title
	Author
	Editor
	Year, Vols.
	Publisher
575 : Ends abruptly	Remarks

ન્યાય.વે.

575

Tarka Prakasika

तर्कप्रकाशिका श्रीगणेशाय नमः॥ ॐ॥ प्रत्यक्षनिरूपणानंतरं उपजीव्योपजीवकभावसंगत्या अनुमानं निरूपयन् प्रति
१ जानीते॥ अथेति॥ अथशब्दोत्रानंतर्यवचनः॥ तत्र च प्रत्यक्षनिरूपणस्यार्थादवधित्वमवगम्यते॥ अत
एव च सिद्धत्वमपि॥ निरूप्यत इति वर्तमानार्थकलिट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः॥ ए
वं च सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यत इति न्यायेन मलिनं तेव पुस्त्नाया इत्यत्रेवात्रापि
प्रत्यक्षानुमाननिरूपणयोरुपजीव्योपजीवकभावलाभः॥ तथा चोपजीवकत्वसंगत्याऽनुमानस्य निरूपण
मिति भावः॥ यद्यप्यनुमितिकरणत्वेनानुमानज्ञानेन प्रत्यक्षज्ञानापेक्षेति तन्निरूपणयोरुपजीव्योपजी
वकभावासंभवस्तथापि सविशेषणे हीति न्यायेन निरूप्यप्रत्यक्षानुमानयोरेवोपजीव्योपजीवकभावलाभः॥ व२
अत्र चोपजीवकं निरूप्याद्युपजीव्यनिरूपणादुपजीवकत्वादिसंगतेरानंतर्यानियामकत्वेपि स्वतंत्रेच्छस्ये
ति न्यायेन रक्षायाएव नियामकत्वान्नपौर्वापर्यनियम इति ध्येयं॥ ननु निरूपणप्रतिज्ञायाः विषयांतरसंचा ॥राम॥

रराहित्यरूपशिष्यावधानप्रयोजनकत्वेपि उन्मत्तप्रलपितत्वादिनिरासाय संगतत्वाभिधानस्यैवोचितत्वं न तु सं न॰
गतिप्रदर्शनस्येति पि व्यर्थत्वादिति चेन्न॥ द्विविधं शिष्यावधानं अनुपेक्षणीयत्वं विषयांतरसंचारराहित्यरू
२ पं च॥ तत्रासंगतत्वज्ञानेनोपेक्षासंभवात्संगतिप्रदर्शनमावश्यकं॥ तथा च संगतिज्ञाने सति असंगतत्वज्ञानासंभ
वात्तन्नासंगतत्वज्ञानप्रयुक्तोपेक्षणीयत्वं॥ द्वितीयं च प्रतिज्ञयेति परमरहस्यमत्रानुसंधेयं॥ ग्रंथमध्येपि मंग
त॰४ लाचाराद् अथशब्दो मंगलार्थकएवेत्यपि कश्चित्॥ आनंतर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं॥ तथा च प्रत्यक्षनिरू
पणध्वंसाधिकरणक्षणवृत्तिनिरूपणविषयः अनुमानमिति शाब्दबोधः॥ तत्र लक्षणस्वरूपप्रामाण्यादिप्रका
रकनिरूपणविषये अ x मानवर्त्तमान x नुमाने॥ करणत्वमात्रस्य कुठारादौ मितिकरणस्य प्रत्यक्षादावितिव्या त॰२
प्तिवारणायानुमितिरिति करणत्वमिति विशिष्टोपादानं॥ ननु अनुपश्चान्मितिर्ज्ञानमिति व्युत्पत्त्या किंचि
ज्ज्ञान्यज्ञानकरणत्वं लक्षणं लब्धं॥ तच्चातिप्रसक्तमित्यत आह॥ अनुमितित्वं चेति॥ तथा च न किंचिज्जन्यज्ञा

तर्कप्रकाशिका नत्वं अनुमितित्वं अपितु जातिविशेष एव। तदवच्छिन्नकारणत्वं च न प्रत्यक्षादाविति नातिव्याप्तिरिति भावः। न
२ पक्ष। व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति नियमेनेतरभेदानुमापकमेवेतल्लक्षणं वाच्यं। इतरभेदा
नुमानं चानुमानं प्रत्यक्षादिभ्यो भिद्यते अनुमितिकरणत्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षादीत्याकारकं। तेन चा
नुमितेः प्रत्यक्षप्रमितिवैलक्षण्याज्ञाने प्रत्यक्षप्रमाणेपि अनुमितिग्रहसंभवेन प्रत्यक्षभेदासत्वेन व्यभिचारापत्तेरि तिकरणत्व
तिलक्षणप्रयोजनमनुपपन्नमित्यत आह। अनुमितित्वं चेति। प्रत्यक्षप्रमित्यनंतरमनुमिनोमीत्यनुव्य
मिति ४ वसायानुरूपात् प्रत्यक्षप्रव्यावृत्तमनुमितित्वमेव तद्विषयः। तच्च न प्रत्यक्षे इति प्रत्यक्षप्रमितिविलक्षणप्रमितिकर
णत्वहेतुकमितरभेदानुमानं सुकरमेवेति न कोपि दोष इति सारं। केचित्तु। व्याप्तिविशिष्टपक्षधर्मताज्ञानं जन्यज्ञानं
करणत्वमेवानुमितिकरणत्वं वाच्यं। तत्र च। व्याप्तिज्ञानत्वादेव वैरंगमकत्वसंभवेनाधिकस्य वैयर्थ्यमिति इ ॥राम०॥
तरभेदानुमानमनुपपन्नमित्यत आह॥ अनुमितित्वं चेति। तथा च जातिरूपानुमितित्वावच्छिन्नकरणत्वेने २

वी२

व१ तल्लक्षणं वाच्यं। न तूक्तरूपमिति न व्यर्थत्वशंकापीत्याहुः। नन्वनुमानत्वं अनुमितिकरणत्वं तथा च इतरभेदानुमा
नेपक्षतावच्छेदकहेतोरभेदेनान्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया हेतौ साध्याधिकरणवृत्तित्वरूपत्वव्याप्ति ल२
ज्ञाने जायमान एव तुल्यवित्तिवेद्यतया साध्येपि हेत्वधिकरणवृत्तित्वग्रहसंभवेन पक्षतावच्छेदकाश्रये साध्य
सिद्ध४ सिद्धेः साधनापत्तिरिति नियमेन भेद आवश्यकः। यदि च हेतौ साध्याधिकरणवृत्तित्वे ज्ञातेपि पक्षतावच्छेदकावच्छेदे
न साध्यसिद्धेरनुदयान्न सिद्धसाधनावकाशः। अन्यथा पृथिवीतरभेदवती गंधवत्वादित्यत्रापि पृथिवीत्वा
धिकरणे घटादौ इतरभेदस्य निश्चितत्वादनुमित्युच्छेद एव स्यात्। किंच व्यतिरेकव्याप्तिज्ञानस्यापि अनुमितिकर
णतया साध्यसामानाधिकरण्यस्य तत्राघटकत्वेन न सिद्धसाधनमिति विभाव्यते तथापि उद्देश्यतावच्छेदक
विधेययोरैक्येन शाब्दबोधानुपपत्तिरेव। अन्यथा दंडवान् दंडवानित्यादेर्निराकांक्षितत्वानुपपत्तेरिति। भे
व। अनुमानपदवाच्यस्य लक्ष्यतावच्छेदकत्वेन कुत्राप्यनुपपत्तेरभावादिति। केचित्तु। नामार्थयोर्भेदेना
न्वितसंबंधेनान्वयबोधे प्रत्यक्षत्वोरकारणतात् अव्यभिचारीति। ननु तथापि जन्यज्ञानजन्यत्वाव्यभिचारि
दे१
साध्य

तर्कप्रकाशिका

२

जातिमदनुभवत्वं तत्त्वमित्यास्तामलं व्यभिचारीत्यंतेनेत्यत आह। उपमितिश्चेति। उपमितित्वशाब्दत्वयोरतिदेशवा
क्यार्थज्ञानपदज्ञानादिरूपजन्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरिति भावः। अतिव्याप्तिं निराकरोति।
तद्धीति। उपमितित्वं शाब्दत्वमित्यर्थः। यथोक्तज्ञानेति। जन्यशाब्दज्ञानेत्यर्थः। तदेवोपपादयति। उपमितीति। अ
तिदेशेति। गोसदृशो गवयपदवाच्य इत्याकारकशब्दविषयकज्ञानजन्यत्वादित्यर्थः। सर्वासामित्यनेनोप
मितित्वस्य तादृशज्ञानजन्यत्वव्याप्यत्वं लब्ध्यं एवं च तद्व्यभिचारस्य तत्रासंभवान्नातिव्याप्तिरिति भावः॥
शाब्दानुभवानां शाब्दबोधात्मकानुभवानां। क्वचिच्छब्दानुभवानामिति पाठः। तत्र शब्दप्रयोज्यानुभवाना
मित्यर्थः। नन्वत्र प्रथमजन्यत्वोपादानवैयर्थ्यमित्याशयेन शंकते। नचेति। व्यभिचारीति। व्यभिचारित्वे
एवकारेण प्रथमजन्यत्वव्यवच्छेदः। उत्तरयति। अनुमितित्वस्येति। असंभवादिति। तथा च तादृग्जात्यप्रसि
ध्या तद्धत्वमादाय न लक्षणगमनसंभव इति भावः। निषेधेति। तस्येति। तत्त्वज्ञाननवृत्तिवैजात्यस्येत्यर्थः।
शब्देति। आत्माशरीरादिभ्यो भिन्नः तत्त्वमसीत्यादिवाक्यविशेषविषयकेत्यर्थः। इदं च मननेशाब्दस्यापुष ॥राम॥

२

ना ३

विधेय ५

धानभ्युपगमेऽनुमितिकरणत्व [illegible] मित्यस्य अनुमितिसंबंध्यभिन्नं कारणमित्यर्थः। अनुद्दर्कक [illegible] धातुन
अनुमितिः करणल्युटा करणं बोध्यते। तथा चानुमितिकरणमनुमितिसंबंध्यभिन्नं करणमिति शाब्द
बोधानुपपन्नः करणतायाः कार्यघटितत्वेनानुमितिकरणस्य करणपदार्थत्वेऽपि अनुमितिकरणमनुमि
तिसंबंध्यभिन्नानुमितिकरणमिति शाब्दबोधोऽपि नानुपपन्नः। विधेयतापर्याप्त्यधिकरणोद्देश्यता
वच्छेदकयोरैक्य एव शाब्दबोधानुदयाभ्युपगमात्। अन्यथा दंडवान् दंडवानिति शाब्दबोधा
उपपत्तेः इत्याहुः। नन्वनुमितित्वस्यैवानुमिति [illegible] त्वेन लक्षणत्वस्य तावच्छेदकयोरैक्यमित्य
त आह। जन्यज्ञानेति। जन्यज्ञानजन्यत्वाव्यभिचारिणी जन्यशब्दधीजन्यत्वव्यभिचारिणी
[illegible] धीजन्यत्वस्य व्यभिचारिणी या जातिः अनुमितित्व तद्धत्वमादाय लक्ष
तद्दनुभवत्वमेव लक्षणार्थः॥ जन्यज्ञानजन्यत्वाव्यभिचारिणीत्युक्तौ [illegible] त्वाव्यभिचारिणीत्व जन्यत्व
१ काव्याजन्यशाब्दधी। जन्यत्वस्याव्यभिचारिणी चर्यो [illegible]
जाति। ४१

नक्षत्र प्रत्यक्षभिन्नं प्रति चक्षुष्ट्वेन न हेतुतया तत्र जन्यत्वस्य पादि जन्यत्वव्याप्यत्वं चाक्षुषत्वस्येति न दोषवारणप्रसारानपहानि बेरा॥ तत्र्यास्य
जन्यज्ञाननिरूपितासाधारणजन्यत्वमित्यस्य धरिति [illegible] पत्तनुपपत्तिः जन्यत्वाव्यचारित्वात् ज्ञानजन्यत्वाव्यचारिजन्यज्ञानत्वाव्य
चारित्वस्तुक्तावपि चाक्षुषत्वादेरवारणात् तज्जन्यज्ञानजन्यत्वाव्यभिचारीत्वं तत्। जन्यज्ञानजन्यत्व [illegible] समानाधिकर

तदुर्भ अ. णसमन्वयः। तथा च तस्य स्वरूपतः लक्ष्यतावच्छेदकत्वेन तादृशजातित्वेन च लक्षणत्वेन न तयोरैक्यमिति लिखु त्वे ४८
२ भावः। ननु जातिमद्दत्तुमवत्त्वमेव लक्षणमस्तु किमेतद्विशेषणेनेत्यत आह। प्रत्यक्षत्वेति। अव्याप्तिं निराक तिर
रोति। ज्ञानाजन्येति। जन्यज्ञानाजन्येत्यर्थः। नित्येश्वरसाक्षात्कारे तद्धीति। तत्प्रत्यक्षत्वं धीजन्यत्वं जन्यज्ञाने
तिथ जन्यत्वं। तथा च प्रत्यक्षत्वस्य जन्यज्ञानजन्यत्वाव्याप्यत्वान्नाव्याप्तिरिति भावः। तत्रापि जन्यज्ञानजन्यत्वा
व्यभिचारित्वदले पि अतिव्याप्तिमुपपादयति। तद्धीति॥ चाक्षुषेहीत्यर्थः। तदाश्रयाणामिष्यधामिति। चाक्षुष सं
से अनि ५ त्वाश्रयाणामित्यर्थः। जन्यपदोपादानेन च चाक्षुषत्वस्य जन्यज्ञानाजन्ये निर्विकल्पके सत्त्वेन जन्यज्ञानजन्यत्वाभावे व्यभिचारि
त्वाभावान्न तदाश्रयप्रत्यक्षे अतिव्याप्तिरिति भावः। जन्यजन्यत्वाव्यभिचारीत्युक्तावपि चाक्षुषत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वा
त्तथैवातिव्याप्तिरित्यतः ज्ञानेति। यदि च ज्ञानपदोपादानेपि कालोपाधिविधया जन्यज्ञानजन्यत्वं निर्विकल्पकेतिसे चाक्षुषत्वमा पी
योक्तदोषतादवस्थ्यात् जन्यज्ञाननिरूपितासाधारणजन्यतावरूपानि बेरानीपा। तथा च ज्ञानपदानुपादानेपि जन्यज्ञानजन्यत्वाबच्छिन्ने
प्रत्यक्षे शरीरस्य हेतुतया शरीरादिहेतेनिरूपितासाधारणजन्यत्वं न निर्विकल्पके इति तद्दैयर्थ्यमिति विभाव्यं तत्तथापि सा [illegible] ॥रामः॥

तृतीयपुढेनंक२६ प्रथमपन्नोशोधपत्रमिदं॥ २

[illegible]

२४

सर नीतमानमभिप्रेत्य अव्यभिचारित्वादिति। तथा च तस्य शब्दज्ञानजन्यत्वव्यभिचारित्वाभावादेव वारणमिति भावः। ननु
निदिध्यासनोपक्षीणमनननं न तत्त्वज्ञानजनकमतस्तस्यापि शब्दज्ञानजन्यत्वव्यभिचारित्वमेवेत्यत आह। जातिवे पदं रे
ति। वाकारश्चार्थ तत्त्वज्ञानस्य मननजन्यत्वानंगीकारेपि न क्षतिरिति सूचनाय। यद्वा। ननु शरीरादिभिन्नत्वेन श्रुतस्या कै ४०
मि४ त्मनः युक्तिभिर्विचिंतनं मननं तदुक्तं मंतव्यश्चोपपत्तिभिरिति। तच्चानुमानादिजन्यमनुमित्यात्मकमेव वा अनुमितावुपनी
तभाननिषेधेन च तस्य शब्दविषयकत्वासंभवात्तैः शब्दस्य ज्ञानजन्यत्वव्यभिचारित्वं तत्राक्षुण्णमेवेत्याह। जातिपदस्ये
ति। वाकारश्चार्थ मननस्य शब्दविषयकत्वानभ्युपगमेपि न क्षतिरित्येतत्सूचयेनोति। केचित्तु। शब्दविशेषविषयकेति।
श्रोतव्यो मंतव्य इत्यादि श्रुतिवाक्यरूपशब्दज्ञानेत्यर्थः। जन्यशब्देत्यादि। जन्यत्वं प्रयोज्यत्वं जन्यशब्दज्ञानप्रयो
ज्यत्वाव्यभिचारित्वादित्यर्थः। तथा च जन्यशब्दधीजन्यत्वव्यभिचारित्वे पदेन जन्यशब्दज्ञानप्रयोज्यत्वव्यभिचा
रित्वमेव विवक्षणीयं तेन तत्त्वज्ञानद्वारा तज्ज्ञानस्य च शब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव नातिप्रसंग इति भावः।
ननु तेन क्तित्वादिवारणाय जातिपदस्य मानसावृत्तिजातित्वपरत्वावश्यकत्वे तन्न एवात्राप्यतिप्रसंगवारणे
वै० ५४ लिंगोपहितलैंगिकज्ञाने प्रमाणाभावेन लिंगविधयापि शब्दस्यानु×
५४ मितौ भानासंभवाच्च तथा च ×

तर्कप्रकाशिका
४

किंजन्यत्वपदस्य प्रयोज्यत्वपरत्वमंगीकृत्य तादृशातिव्याप्तिवारणेनेत्यत आह। जातिपदं चेति। वाक्यजन्यत्व
पदस्य प्रयोज्यपरत्वाभावेपि नक्षतिरिति सूचनाय तस्याहुः। तदसत्। शब्दज्ञानप्रयोज्यत्वव्यभिचारित्वविषयक
लिंगादिवाक्यरूपशब्दज्ञानजन्यादृष्टजन्यत्वस्यानुमितावपि सत्वादनुमितित्वस्यापि तत्प्रयोज्यत्वव्यभि
चारित्वाभावादसंभवापत्तेरिति। अत एवेति। जातिपदस्य मानसावृत्तिजातिपरत्वादेवेत्यर्थः। भक्तित्वेति।
आराध्यत्वेन ज्ञानं भक्तिः आराधना च गोरवित प्रीतिहेतुभूतक्रिया। फलावश्यंभावनिश्चयश्च श्रद्धेति ल
क्षणे बोध्ये। आराध्यव्यक्तिज्ञानं विना आराध्यत्वेन ज्ञानासंभवात् एवं फलज्ञानं विना फलावश्यंभावनिश्च
यासंभवाच्च भक्तित्वश्रद्धात्वयो जन्यज्ञानजन्यत्वव्यभिचारित्वस्य सत्वात्। जन्यशब्दधीजन्यत्वस्यापि स
त्वाच्च तत्रातिव्याप्तिः। जातिपदस्य मानसावृत्तिजातिपरत्वे च एतयोर्मानसवृत्तित्वेन नातिप्रसंग इ
ति। ननु भक्तित्वश्रद्धादिजातित्वे मानाभावादेव नातिव्याप्तिरित्यत आदेरिति। आपत्तित्वं लक्षः आ पंदि २
पाद्यत्वस्य विधेयतानिरूपितत्वे मानाभावेन वह्न्यनुमित्यनंतरमेव वह्निमापादयामीति प्रतीत्यापत्तेः। ।।राम।।

त्या २ आदिना २

तादृशानुव्यवसायं प्रति वह्निविधेयकापत्तित्वेनैव हेतुतया आपत्तित्वजातेरावश्यकत्वेन तद्वारणाय
जातिपदस्य मानसावृत्तिजातिपरत्वमावश्यकमिति ध्येयं। अनुभवपदव्यावृत्तिमाह। अनुभवपद
मिति। स्मृतिवारणायेति। स्मरामीत्यनुगतप्रतीत्या अनुभवसामग्रीप्रतिबध्यतावच्छेदकतया वा सि
द्ध स्मृतित्वमादाय अतिप्रसंगवारणायेत्यर्थः। अनुभवो पदोपादाने च स्मृतिभिन्नज्ञानत्वरूपानुभवत्व
स्य स्मृतावसत्वान्नातिव्याप्तिरिति भावः। ननु तथापि तादृशपरोक्षत्वजातिमादायैतल्लक्षणस्य शाब्द
बोधादौ अतिप्रसंगः। न च तादृशजातौ मानाभावः। अनुमित्यादिस्थलीय बाधादिप्रतिबध्यतायां
आहार्यप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यज्ञानत्वस्यावश्यं निवेशनीयतया तेषां मिथो विशेष
णविशेष्यभावे विनिगमनाविरहेण गौरवात्तदपेक्ष्य परोक्षत्वजातेरेव प्रतिबध्यतावच्छेदकत्वौ
चित्यादित्यत आह। द्विमिति। अनुभवत्वं विहाय परोक्षत्वं विहाय विहाय अनुभवत्वं प्रत्यक्षे अनुमि

स्मृतौ अनुभवत्वं २ स्मृतौ परोक्षत्वं २

तर्कप्रकाश. ५

तौ चोनयोः समावेश इति अनुभवत्वेन संकरान्न परोक्षत्वं जातिः॥ एवं भिन्नविषयकानुमित्या विशिष्टा
नुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धानुमित्यन्यत्वान स्वरूपजातिमादाय संकरात्। विधेयता पर
या आपत्तिसाधारण्येन बाधप्रतिबध्यतावच्छेदकत्वासंभवेपि अनुमित्यादौ विशिष्य अनुमित्यादिकं
त्वं निवेश्यैव बाधबुद्धेः प्रतिबंधकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः॥ अत एव शाब्दबुद्धे बोधे बाधबुद्धेः प्रतिबंध ति२
त्वप कत्वं स्यान्नत्र तया लाघवाद् योग्यताज्ञानं शाब्दबोधहेतुरिति सिद्धांतः॥ अनाहार्यप्रत्यक्षान्यत्वं निवेश्यैव वा आहा
र्यप्रत्यक्षे व्यभिचारो वारणीयः। वस्तुतस्तु जन्यतासंबंधेन बाधविशिष्टान्यत्वावच्छिन्नं प्रति बाधाभावस्य
हेतुत्वोपगमेन प्रत्यक्षानुमित्यादिसाधारणैककार्यकारणभावेनैवोपपत्तेः। परोक्षत्वनिवेशस्यानर्थक्यात्।
इच्छाविशिष्टावच्छिन्नं प्रति इच्छाया हेतुत्वेन च नेच्छाशून्यकाले बाधकाले विशिष्टबुद्ध्यापत्तिः॥ अन्यथा इच्छया
उत्तेजकत्वे अप्रामाण्यज्ञानाभावादिभिर्विशेषणादिशेषभावे विनिगमनाविरह इत्यादिकं बहुतरमूहनीयं॥ ॥राम॥

त्वार

नोमी२

नन्वनुमितित्वजातौ मानाभावेन लक्षणमसंभवि। न चानुमिनोमीत्यनुव्यवसायविषयतया तत्सिद्धिः॥ यो
ग्यात्मविशेषगुणानां विषयविनिर्मोकेण भानानुपगमात्। केवलं अनुमित्यनुव्यवसायस्यासिद्धेः। न च नोमी२
पर्वते वह्निमनुमित्यनुव्यवसायविषयतया तत्सिद्धिरिति वाच्यं। वह्निप्रकारकानुमितित्वस्य तद्विषयत्वे
वह्निमान् पर्वतो घटवानित्यनुमित्यनन्तरं तादृशानुव्यवसायापत्तेः। वह्निनिष्ठाधेयताशालितानु वि४
त्वस्य तद्विषयत्वावश्यकत्वे अनुमितित्वस्यानिवेशात् तद्विषयतया तत्सिद्धेरभावात्। न च पर्वतोद्देश्यकव दे२
ति४ ह्निविधेयकानुमितित्वस्य धूमपरामर्शजन्यतावच्छेदकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरिति वाच्यं। साधनभे
देन व्याप्तिभिन्नतया आलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वाव्यवहितोत्तरत्वे
क्षणोत्पत्तिकत्वसंबंधेन धूमपरामर्शविशिष्टानुमितित्वस्य तत्कार्यतावच्छेदकत्वावश्यकत्वे तत्रानुमिति
त्वमनिवेश्य धूमपरामर्शविशिष्टज्ञानत्वस्यैव तत्त्वोपगमात्। तत्कोटिप्रविष्टतया तत्सिद्ध्यसंभवात्। एवं सिद्ध

तर्कप्रकाशि ध्यभावविशिष्टस्यैत्वेवसिध्यमानकार्यतावच्छेदकतयानत्कार्यावच्छेदकतयापिनतत्सिद्धिरितिचेन्नैवं।वह्निनिष्ठवि
धेयताशालिज्ञानत्वस्यवह्निमनुमिनोमीत्यनुव्यवसायविषयत्वेपर्वतोवह्निमान्स्यादित्यापत्त्यनंतरमपितादृ
६ शानुव्यवसायापत्तेः।तथाहि।वह्निमापादयामीत्यनुव्यवसायस्यवह्निप्रकारकापत्तित्वविषयत्वेवह्नि
मान्पर्वतोघटवान्स्यादित्यापत्त्यनंतरमपितादृशानुव्यवसायापत्त्यावह्न्यापादकापत्तित्वेनैवतद्विषयो
वाच्यः।तच्चापाद्यत्वस्यापाद्यभेदेनभिन्नस्यातिरिक्तस्यकल्पनेगौरवात्।अनुमित्यादिसाधारणवि
धेयत्वमेवापाद्यत्वंतथाचानुमित्यनंतरमापादयामीत्यनुव्यवसायापत्त्याआपत्तित्वस्यैवापत्त्यनंतरमप
नुमिनोमीत्यनुव्यवसायापत्तेरनुमितित्वस्यापिसिद्धेः।एवंपर्वतेवह्निरित्यादिशाब्दबोधानंतरमपितादृशा
नुव्यवसायापत्तिः।शाब्दबोधेप्राङ्निर्दिष्टस्यैवोद्देश्यत्वेनचरमनिर्दिष्टस्यचविधेयत्वेनचतत्रवह्नेर्विधेयत
याआवश्यकत्वात्।अन्यथा।वह्निपर्वतयोरेवोद्देश्यविधेयभावस्वीकारेपर्वतेवह्निःवह्निःपर्वतेइतिशाब्द ॥राम॥
६

बोधयोरुद्देश्यविधेयभावाविलक्षणत्वेनाविलक्षणत्वप्रसंगात्।अथविधेयतायामनुमितित्वेप्रमानाभावः।वह्निप्र
कारकज्ञानत्वस्यैववह्निमनुमिनोमीत्यनुव्यवसायस्यविषयत्वात्विषयतयातादृशानुसा[illegible]मतिचतत्तदनुमि ५२
तिसामग्रीविशिष्टज्ञानत्वेनतादात्म्यपस्यांहिहेतुत्वंकार्यतावच्छेदकंचवह्निप्रकारकत्वंतत्तत्सामग्रीविशिष्टज्ञानविषय
कमानसत्वमेव।तत्तदनुमितिसामग्रीचबाधाभावसिध्यभाववत्तत्परामर्शादिरूपासामग्रीवैशिष्ट्यंचस्वाव्यव
हितोत्तरक्षणोत्पत्तिकत्वसंबंधेन।नन्वेतदपेक्ष्यवह्निनिष्ठविधेयताशाल्यनुमितित्वेनहेतुत्वेलाघवाद्विधेय
तानुमितित्वस्यचसिद्धिरितिवाच्यं।लाघवमात्रेणातिरिक्तविषयतासिद्धौअव्यवहितोत्तरत्वादेर्निवेशेगौ
रवेणधूमपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनापिअतिरिक्तविषयतासिद्धिप्रसंगात्।एवमनुमितिप्रतिविल
क्षणविषयताशालिज्ञानत्वेनहेतुतयैवोपपत्तौव्याप्त्यादिविषयतानिवेशेप्रयोजनाभावाच्च।तल्लाघवमेवविधे
त्रेणविषयतासिद्धेरभावात्।विधेयतांमानानाभावेनसामग्रीविशिष्टज्ञानत्वेनहेतुत्वस्यावश्यकत्वेविधे
यतायामिवानुमितित्वेपिमानाभावइतिचेन्न।लाघवेनातिरिक्तविषयतायाअनभ्युपगमेपिआप

तर्कप्रकाशिका

७

त्यनंतरं तादृशानुव्यवसायवारणाय बाधाभावस्यावच्छेदककोटौ निवेशे गौरवात् तदघटितानुमितिसाम
ग्रीविशिष्टे वह्निप्रकारकानुमितित्त्वेन हेतुत्वेनैवाव्यवधानं तरं तादृशानुव्यवसायवारणे लाघवेनानुमिति
त्वजातेरावश्यकत्वात्। वस्तुतस्तु। सामग्रीजन्यत्वानुपस्थितिदशायामपि वह्निं नानुमिनोमीत्यनुव्यव
सायानुदयात् सामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विषयत्वाभावे न विह्निनिष्ठविधेयताशाल्यनुमिति
त्वावच्छिन्नाभावस्य तद्विषयत्वावश्यकत्वात् विधेयतायामनुमितित्वजातेभ्दे सिद्धेः। न च स्वव्याप्यतावत्प
रामर्शादिघटितसामग्रीविशिष्टज्ञानत्वसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगितावच्छेदकताकज्ञानाभाव
एव तद्विषय इति वाच्यं। तस्य संबंधत्वे मानभावात्। वृत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेद
कत्वाङ्गीकृतं पक्षविलेन। ननु ज्ञायमानलिंगस्यानुमि•तिकरणत्वे ऽतीतानागतहेतुकानुमितेरप
लापः। तस्यानुमितेः पूर्वमसत्वात्। अन्यस्य च व्याप्यत्वेनाज्ञानात्। वाक्ये सैरेस्याभावेन यच्चाविशे
ष्यविशेषणमितिन्यायेन परामर्शस्य चापि परामर्शात् पूर्वं व्याप्तिज्ञानासंभवेन च व्याप्तिज्ञानत्वेनापि न ।।राम।।

७

करणत्वसंभव इत्याशयेन पृच्छति। नन्विति। लघुपदार्थेति। हेतुसाध्यअभावज्ञानादिकमित्यर्थः। न चाभावज्ञा
नत्वेन ज्ञानत्वेन वाऽनुमितिहेतुत्वे परामर्शादिशून्यकालेप्यनुमित्यापत्तिरिति वाच्यं। विशेषसामग्रीसहक
ताया एव सामान्यसामग्र्याः फलोपधायकत्वेन परामर्शाधिभावेनापत्त्यभावादिति वक्ष्यति। अत्र ध्येयेपि
व्याप्तिघटकेस्येव वक्तुमुचितं तथापि व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शद्वारा तस्य करणत्वसूचनाय
तथोक्तेः। ननु व्याप्तेर्निर्वक्तुमशक्यतया कथं तद्घटितपदार्थज्ञानं करणमित्याशयेन पृच्छति। ननु केयमिति। साध्या
वर्द त्यंताभावादिति। वह्निमान् धूमादित्यादौ वह्न्यभाववति जलह्रदादौ धूमस्याविद्यमानत्वाल्लक्षणसमन्वयः। धूमवान्
वह्नेरित्यत्र धूमाभाववति अयोगोलके वह्नेर्विद्यमानत्वान्नातिव्याप्तिः। पर्वतीयेति। पर्वतीयवह्नेस्तद्व्यक्तित्वे
नात्यंताभाववत्तीत्यर्थः। सर्वक्षणवृत्तित्वविशिष्टवह्न्यभाववह्निघटोभयाभावसमवायिसंबंधावच्छिन्नवह्न्यभा
वादीनां वेशिकव्यासज्यवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वेन साध्याभाव

८५

ध्य

तर्क·प्र·अ·मा· विशेषणेन वारणं संभवतीति तत्परित्यागः। ननु साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियो
८ गिताकाभावाधिकरणनिरूपितसंबंधावच्छिन्नवृत्तित्वसामान्याभाववत्त्वं व्याप्तिः समवायसंबंधावच्छिन्न
वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वसाध्यतावच्छेदकतावच्छिन्न
त्वनिवेशः। अत एव पर्वतीयवह्न्यभावस्यापि निरासः। ननु पर्वतीयवह्नित्वं पर्वतीयत्वविशिष्टवह्नित्वं विशिष्ट
स्यानतिरेकात् वह्नित्वावच्छिन्नप्रतियोगिताकत्वमस्त्येवेति वाच्यं। साध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यता
वच्छेदकपर्याप्तावच्छेदकताकत्वार्थकत्वेन पर्वतीयवह्नित्वोभयपर्याप्तावच्छेदकतया शुद्धवह्नित्वपर्याप्तत्वाभा
वेनानुपपत्त्यभावात्। यद्विचउभयादिः प्रत्येकानतिरिक्ततया पर्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकतायाअ
पि शुद्धवह्नित्वपर्याप्तिसत्वादुक्तदोषस्तदवस्थ एवेति विभाव्यते। तदा साध्यतावच्छेदकभिन्ननिष्ठावच्छेदकता
निरूपकत्वे सति किंचिदवच्छेदकत्वानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितकप्रतियोगिताक ।।राम।।

८

वे१ त्वमितिनिष्कर्षार्थो बोध्यः। सत्यंतनिवेशात् पर्वतीयवह्नित्वोभयावच्छिन्नप्रतियोगितामादाय विशेष्यदलनिवे
शाच्च पर्वतीयत्वविशिष्टवह्नित्वावच्छिन्नत्वावच्छिन्नप्रतियोगितामादाय यथायथं नातिप्रसंगः। वह्न्यभाववति ति१
धूमावयवे समवायेन धूमस्य सत्वाद्धेतुतावच्छेदकसंबंधनिवेशः। धूमाभाववज्जलह्रदवृत्तित्वाभावस्य
वह्नौ सत्वाद्धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय सामान्याभावेति। इत्थं चायोगोलकवृत्तित्वस्या
पि सामान्यांतर्गततया तदभावस्य हेतुतावत्सत्वान्नातिव्याप्तिः। न च तथापि अयोगोलवृत्तित्वघटोभयाभाव त्ति५
स्य सत्वादतिप्रसंगतादवस्थ्यमिति वाच्यं। तादृशवृत्तित्वावच्छिन्नाभावस्य हेतावसत्वान्नातिव्याप्तिः
सामान्याभावपदेनलाभात्। अथ कालिकसंबंधेन वह्न्यभाववति पर्वतादौ धूमस्य सत्वात्साध्याभाव
वत्त्वमभावीयदैशिकविशेषणताविशेषेणैव वाच्यं। एवं च घटत्वाभाववान्पटत्वादित्यादौ घटत्वाभावाभा
वस्य घटत्वरूपस्य समवायेनैव सत्वादभावीयविशेषणतया तदधिकरणाप्रसिद्धिः। अत्र केचित्।

साध्याभावस्य॰

भावा२

त तर्कवि·अनु· ९ भूतलेघटोनास्तीत्यत्रैवघटाभावोनास्तीतिप्रतीतावपिअभावीयदैशिकविशेषणताविषयकत्वेभूतलेतेरिति य·
भावाभावसाधारणींविशेषणतांमंगीकृत्याप्रसिद्धिंपरिहरंति।तदसत्।तथासत्यपिकालिकसंबंधाव
च्छिन्नप्रतियोगिताकस्याकाशाभावस्यसाध्यतायांमात्मत्वादिहेतावव्याप्तेः।आकाशाभावरूपसाध्या
भावस्याभावीयविशेषणतयाआत्मनिवृत्तेः।एवंभावाभावसाधारणविशेषणतास्वीकारेऽभावीय
विशेषणतयाभूतलवृत्तिर्घटइतिप्रतीत्यापत्तेश्चेतिचेत्।मैवं।साध्यवत्ताग्रहविरोधितानियामक
संबंधेनसाध्याभाववत्त्वस्यविवक्षितत्वात्।घटत्वाभाववान्पटत्वादित्यादौसमवायएवघटत्वाभा
ववत्ताग्रहविरोधितानियामकइत्यप्रसिद्धेरसंभवात्।ननुतथापिजातिमान्सत्त्वादित्यादौजात्य
भाववत्सामान्यादौनिरूपितहेतुतावच्छेदकसमवायेनवृत्तित्वाप्रसिद्ध्याऽव्याप्तिरितिचेन्न।स्वाधिक
रणवृत्तिसाध्याभाववत्त्वमित्यस्यतदर्थत्वात्।अथैवमपिधूमाधिकरणेकालिकसंबंधेनवह्न्यभा ॥राम०॥ ९

ति३

९ वृत्तेः।तथाचसाध्यवत्ताग्रहविरोधितानियामकसंबंधेनावृत्तित्वस्यावश्यनिवेशनीयतया२

वत्त्वादव्याप्तिः।अभावीयविशेषणतयाऽवृत्तित्वनिवेशेचघटत्वाभाववान्प्रमेयत्वादित्यत्रातिव्याप्तिः।
घटत्वाभावाभावस्यघटत्वस्यविशेषणतयासत्ताभाववान्जात्यभावादित्यत्रातिव्याप्तिः।जात्यभा
वाधिकरणसामान्यादिनिरूपितसाध्यवत्ताग्रहविरोधितानियामकसमवायसंबंधावच्छिन्नवृत्ति
त्वाप्रसिद्धेरितिचेन्न।स्वाधिकरणवृत्तिसाध्याभावाधिकरणताकत्वस्यैवविवक्षितत्वात्।साध्या
भावाधिकरणताचसाध्यवत्ताग्रहविरोधितानियामकसंबंधावच्छिन्नाबोध्या।अत्रवृत्तित्वं
स्वरूपसंबंधेनैवग्राह्यं।एवंचजात्यभावाधिकरणसामान्यादिनिरूपितस्वरूपसंबंधावच्छिन्न
वृत्तित्वस्यप्रमेयत्वादौप्रसिद्धत्वात्तदभावस्यचसत्ताभावाधिकरणेचसत्त्वेनानुपपत्त्यभावादि भावा२
ति।अव्याप्यवृत्तिसाध्यकाव्याप्तिवारणायप्रतियोगिव्यधिकरणपमपत्रनिवेशनीयं।केचित्तु।
सि१ हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकःसाध्याभाववद्

दृत्त्२ स्वप्रतियोगिकत्व२ द्वि२ वद२

तर्कम॰ अ॰ वृत्ति२।। त्तित्वसामान्याभावो व्याप्तिः। तेन सत्तावान् जातेरित्यादौ न कापि दोष इत्याहुः। परे तु। साध्याभावव
द्वृत्तित्वमित्यत्र सत्तावान् जातेरित्यादावप्रसिद्धिवारणाय हेतुतावच्छेदकसामान्ये साध्याभावोऽनुयो २संबंध
प्रा३ गिकत्वं एतदुभयाभावविशिष्टस्वत्वं व्याप्तिरित्याहुः। इति न काप्यनुपपत्तिरिति चेत्। अत्रोच्यते
तथापि केवलान्वयिनि साध्याभावाप्रसिद्ध्या व्याप्तिलक्षणमव्याप्तमेव। नन्वव्याप्तिर्नभिअनुमि
तिकरणत्वेनाभिमतस्य व्याप्तिज्ञानस्य व्यतिरेके व्यभिचार एव सत्र न संभवति। वस्तुगत्या वाच्य
त्वाभावाप्रसिद्धावपि प्रतियोगितया वाच्यत्वीयो भाव इत्याकारकभ्रमात्मकज्ञानमादायानुमितेरुपप क४
न्नत्वात्। तथा हि। साध्यनिष्ठविषयतानिरूपिताभावविषयतानिरूपिताधिकरणविषयतानिरूपि
विषयता२ तवृत्तित्वनिरूपिताभावविषयतानिरूपितहेतुतावच्छेदकावच्छिन्नविषयतानिरूपितपक्षनिष्ठ
विषयताशालिज्ञानत्वेनैवानुमितिहेतुत्वं न भ्रमममादायोपपद्यत एव। अथ अभावो न वाच्यत्वीय इत्ये ।।राम।।

क४ ।।९।।

शवि१ स्वद्वा१

द२ तादृशविषयदर्शनकाले तदनुपपत्तिरेव। न च तदानेष्यत एवानुमितिरिति वाच्यं। तस्याप्यनुभूयमानत्वादि
ति चेत्। तथापि निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्ध्यप्रतिबध्यतया अभावो न वाच्यत्वीय इति ज्ञा
नकालेऽपि प्रतियोगितया वाच्यत्वीयेऽपि इति निर्धर्मितावच्छेदकज्ञानोत्पत्तौ बाधकाभावेनानुमिते
व४ रुपपत्तेरभावत्वमनिवेश्य [illegible] साध्यीयवद्वृत्तित्वज्ञानस्यैवानुमितिहेतुत्वादिति चेन्नैवं। अभावे
त्तित्वज्ञानस्य निर्धर्मितावच्छेदकज्ञानप्रस्यापि प्रतिबधबंधकया प्रतियोगितया वाच्यत्वमद्वृत्ती
ति ज्ञानकाले वाच्यत्वीयवद्वृत्तित्वस्य ज्ञानस्याप्यसंभवेनानुमित्यपलापस्य दुरुद्धरत्वादिति नि
पुणतरमालोचनीयं सूक्ष्मदर्शिभिरिति। ननु नीलघटे यत्किंचिद्घटप्रतियोगिकभेदसत्त्वेन नील
घटो घटान्य इति वाक्यस्यापि प्रामाण्यापत्तिरिति अन्वयितावच्छेदकावच्छिन्नप्रतियोगि
ताकान्योन्याभावबोधं प्रत्येव किंचित्सदं व्याहृतान्यादिपदज्ञानत्वेन हेतुत्वमुपेयं। एवं च प्रकृतेऽपि

समनि१

व्यवच्छिन्न॰

वदन्न॰ का॰ व॰

तर्कप्र॰ अ॰ साध्यवत्पदसमभिव्याहृतान्यादिपदस्यसाध्यवत्प्रतियोगितान्योन्याभाववद्बोधकत्वमेव तथा च सा

ध्यवत्त्वावच्छिन्नप्रतियोगिकान्योन्याभाववदवृत्तित्वमेवलक्षणंलभ्यते तत्र च नोक्तदोष इत्याशयेनाह॥

११ अर्थेति। साध्यवत्त्वेति। साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वेत्यर्थः। अन्यथा साध्यवत्त्वस्य स्वरूपत्वेन साध्ये॰

पर्वतीयवह्निमदन्योन्याभावावारणात्। साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठाव

च्छेदकतानिरूपितप्रतियोगिताकान्योन्याभाववदवृत्तित्वमिति तु निष्कर्षः। साध्यतावच्छेदकावच्छिन्न

प्रतियोगिताकसाध्याभावविवक्षणेन पूर्वोक्तलक्षणेपि चालनीन्यायेनाव्याप्तिनिराससंभवेपि प्र

त्यंताभावस्याव्याप्यवृत्तितया संयोगी द्रव्यत्वादित्यादावव्याप्तिः इह चान्योन्याभावस्य व्याप्यवृत्तितया

संयोगवदन्योन्याभावस्य द्रव्येऽसत्त्वेनैव नाव्याप्तिरिति पूर्वं च प्रतियोगिवैयधिकरण्यादिनिवेशाद्गौ

रवमिति न तत्र च तथा विवक्षितमिति ध्येयं। अव्याप्तिं निरस्यति। न चेति। नहीत्यर्थः। केवलान्वयीति। इ ॥राम॥

व॰ ११

दं प्रमेयं वाच्यत्वादित्यर्थः। अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वं प्रमेयत्वस्य च सार्वत्रिकत्वेन तद्वदन्या

प्रसिद्ध्याऽव्याप्तिरिति भावः। लाघवात्साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानमेवानुमितिहेतुः केवलान्वयि

नि च तादृशज्ञानासंभवेनानुमितिरेव नोपेयते। एवं च काव्याप्तिरिति मीमांसकमतमनुपदर्शयति। अत्र

मीमांसकाः इति। इदं प्रमेयत्वमिति। साध्यवदन्यावृत्तित्वज्ञानाभावेनानुमित्यसंभवादनुमिनोमीत्याका

रकेति किं कप्रत्यक्षानुदयापत्तिरित्यर्थः। न चान्योन्याभावे प्रमेयत्ववत्प्रतियोगिकत्वभ्रमदशायामेव ता

दृशानुभवोपपत्तिरिति वाच्यं। तथापि प्रमेयत्वस्य केवलान्वयित्वज्ञानदशायां तादृशप्रतीत्यनुपपत्ति

तादवस्थ्यात्। कारणबाधात्। विशेषदर्शनदशायां साध्यवदन्यावृत्तित्वज्ञानस्यानुमितिकरणत्वेनाभि

मतस्य बाधात् असंभवात्। भ्रांतिरिति। इदं प्रमेयत्वमनुमिनोमीति प्रतीतिः प्रमेयत्वविधेयकानुमितिरि

व ना तादृशानुव्यवसायविषयः। कारणबाधे न च प्रमेयत्वविधेयकानुमितेरुत्पत्त्या विषयबाधेन तादृशप्र

य॰

तर्कप्र०अ तीतेर्न्धर्मत्वमित्यर्थः। व्यभिचारेण व्यतिरेकव्यभिचारेण। तदुद्देः साध्यवदन्यस्वरूपस्याप्रसिद्धेः। कारणत्वा
१२ सिद्धेरिति। सिद्धे तस्य कारणत्वे तदन्तावेन न तथानुमितिरित्युपेयं तादृशानुमितावेव व्यभिचारेणान्त
स्यैव कारणत्वमसिद्धं। न च परेण तादृशानुमितिरेव नेष्यत इति वाच्यं। तत्रानुभवस्य प्रमाणत्वेन त
शितित्वात्। यथाकथंचित्प्रतीतेः प्रमात्वस्य शक्योपपादनत्वे प्रतीतेर्न्धर्मत्वकल्पनायां न्याय्यत्वा अ४
अन्यथाक्षापि विषयव्यवस्थानस्यादिति भावः। साध्यवदन्यत्प्रमेयत्ववदन्यत् अलीकमित्यनेन प्र
मेयत्वस्य शून्यत्वसूचनं। ननु लीकस्य ज्ञानविषयत्वे मानाभावः स्यत आह। असदिति। शशशृंग
मितिप्रतीतिविषयस्य शशीयशृंगस्यापारमार्थिकत्वेनालीकत्वमेवेति भावः। असत्त्वाप्तेरिति
ज्ञानविषयत्वस्य कालसंबंधित्वव्याप्यत्वादित्यर्थः। तेन न सिध्यसिद्धिव्याघातः। प्रसतोपि भाने का
ज्ञासंबंधिन्यलीक एव ज्ञानविषयत्वसत्त्वेन न तद्व्याप्यत्वं तस्य संभवतीत्यर्थ तस्तन्निरासात्॥ ॥राम॥
१२

शशशृंगमित्यादिप्रतीतेश्च शृंगस्य शशीयत्वेन भानोपगमेनान्यथाख्यात्येवोपपत्तिरिति न तदन्य
थानुपपत्त्या तत्सिद्धिरिति भावः। आयात्वसत्त्वाप्तिस्तथापि प्रमेयत्वसाध्यकाव्याप्तिपरिहारेपि ज्ञेय
त्वादिसाध्यके सोदुबरीति तुष्यतु दुर्जन इति न्यायेनाह। किंचेति। कश्चित्तु सिध्यसिद्धिव्याघातादा
ह। किंचेतीति। तदसत्। उक्तरीत्या तत्परिहारात्। स्वयमपीति। असत्त्वाप्तिस्वीकारेपीत्यर्थः। अव्या
प्तिः साध्यवदन्याप्रसिद्धिनिबंधनाव्याप्तिः तथा अव्याप्तिमेव दर्शयति। न हीति। भवद्भिः असत्त्वा
लिवादिभिः विरोधादित्तिशेषः। लीलावतीकारमतमाशंकते। अन्ये त्विति। संबंधः सामानाधिकरण्य
धूमवान्वह्नेरित्यादौ वह्नेर्धूमसामानाधिकरण्यसत्त्वादिति व्याप्तिरतः कात्स्न्येति। अयोगोलके यद्व
ह्नेर्धूमसामानाधिकरण्येनाविनकात्स्न्येन संबंधाभावान्न दोषः। अत्रास्वरसमाह। न चेति। तत्रत्व
क्षणवाक्यवदंति दूषणं वदंति। कात्स्न्यं साध्ये साधने साधनवतिवेतिमभ्रेमुखेन न तदोहबाह। सोयमि

ति। साध्यैककार्त्स्न्ये दूषणेऽपि नैव साध्यवृत्तिकार्त्स्न्यविवक्षणे दूषणसंभवेन पृथगुक्तत्वादित्याह किंतु प्रसिद्धानुमा
नेवह्निमान् धूमादित्यादौ अव्याप्तिमेव विवृणोति। नहीति। अयःपिंडीयवह्नेरिति। अत्र निरूपित
त्वं षष्ठ्यर्थः। अयःपिंडीयवह्निनिरूपितसामानाधिकरण्याभावादित्यर्थः। एकव्यक्तीति। द्रव्यं पृथिवीत्वा
दित्यादावित्यर्थः। अत्र हेतौ रैक्येन अनेकाश्रयत्वरूपकार्त्स्न्याप्रसिद्धेरिति भावः। एकमात्रवृत्तीति। ए
तद्रूपवान् एतद्रसादावित्यर्थः। तत्र हेतुमत ऐक्येन हेतुमति उक्तरूपकार्त्स्न्यासंभवादिति भावः। ननु
हेतावेव कार्त्स्न्यं विवक्षितं। तथा च प्रकृतकार्त्स्न्यस्य व्यापकत्वरूपतया हेतुतावच्छेदकव्यापकसाध्यसामा
नाधिकरण्यमेव व्याप्तिरिति निष्कर्षः इति चेन्न। द्रव्यं सत्त्वादित्यादौ सत्ताया एकव्यक्तिकत्वेन सत्तात्वव्यापक
द्रव्यत्वसामानाधिकरण्यस्य सत्त्वादव्याप्तेः। मन्वत तथापि हेतुमति कार्त्स्न्यं विवक्षितं तथा च हेतुव्या
पकसामानाधिकरण्यं तत्त्वं। व्यापकत्वं चावच्छेदकतया। यत्र यत्र वह्निस्तत्र तत्रावच्छेदकतया वह्नि ॥राम॥

सामानाधिकरण्यसत्त्वाद्वह्निमान् धूमादित्यादौ लक्षणसमन्वयः। पर्वते धूमे वह्निसामानाधिक
रण्यमिति प्रतीतेः। अथवा हेत्वधिकरणताव्यापकसाध्याधिकरणताकत्वं तत्त्वमिति चेन्न। सा
ध्याधिकरणवृत्तित्वरूपसाध्यसामानाधिकरण्यस्य तत्तदाधेयभेदेन भिन्नतया तद्वन्निष्ठाभा
वाप्रतियोगित्वरूपव्यापकत्वस्यासंभवात् प्रथमस्य दुष्टत्वात् द्वितीये चैतदपेक्ष्य हेतुव्यापकयत्
साध्यं तत्सामानाधिकरण्यस्यैव लघुत्वात्। तस्यापि च वक्ष्यमाणव्याप्त्यपेक्षया गुरुत्वेन हेयत्वादिति सनेन४
न किंचिदेतत्। ननु साध्यसमानाधिकरणाः स्वसमानाधिकरणा यावंतस्तत्कत्वं व्याप्तिरिति। यावंतः
साध्यसमानाधिकरणास्ते सर्वे हेतुसमानाधिकरणा इत्यर्थलाभस्यादरे तु। तत्र अश्वोयं गोरश्वत्वादित्या
हेगोत्वसमानाधिकरणद्रव्यत्वादीनां अश्वत्वसामानाधिकरण्यादति व्याप्ति[illegible]वारणाय यावत्सद
निवेशः। अश्वत्वगोत्वप्रकारकप्रमाविशेष्यत्वादीनामपि यावदेतःपातितया अश्वत्वसामानाधिकरण्याभो

नर्कप्रकाशि अ वेनत्वनां[illegible]तिव्याप्ति[illegible]भावेन। एवंचनसंगच्छतेऽदंवाच्यं तेयत्वादित्यत्रवाच्यत्वसमानाधिकरणानांया
वतामेवज्ञेयत्वसमानाधिकरणात्वालक्षणलक्षणत्वं संभवेपि वह्निमान्धूमादित्यादौवह्निसमाना
॥१४॥ धिकरणानामयोगोलकत्वादीनां धूमसामानाधिकरण्याभावादव्याप्तेः। धूमवान्वह्नेरित्यादावति
व्याप्तेश्चेतिचेत्सत आह। यत्समानाधिकरणइति। वह्निसमानाधिकरणद्रव्यत्वादीधूमसामानाधि नां४
करणपाव्यभिचारित्वपति व्याप्तिवारणाययावंतइति। एवमेवसमुन्नेयति। नेवतिचेत्स्यादित्या।
वंध धूमस्येति। निरूपितत्वेषष्ठ्यर्थः। धूमनिरूपितावह्निष्ठाव्याप्तिर्वह्निरित्यर्थः। अथद्रव्यंगुणकर्मान्यत्वे
सतिसत्वादित्यादौविशिष्टसत्तायाःसत्तायाश्चैक्येनसत्तासमानाधिकरणानांगुणत्वादीनांद्र
व्यत्वसामानाधिकरण्याभावाद्व्याप्तिः। एवंगुणकर्मान्यत्वविशिष्टसत्तावान्ज्ञातेरित्यत्रातिव्या
प्तिश्च। जातिसमानाधिकरणानांसर्वेषांसत्तासामानाधिकरण्यादितिचेन्न। विशिष्टस्यातिरि रराम॥
॥१४॥

नर्कप्रका अ. क्तविशिष्टसत्तावान्जातेरित्यत्रातिव्याप्तेश्च साध्यतावच्छेदकआवश्यकइतिवाच्यं॥ विशिष्टसत्तायाःवि निवेश
१५ शिष्टनिरूपिताधारतासंबंधेनसाध्यतायांजातिसमानाधिकरणगुणत्वादीनां विशिष्टनिरूपि
ताधारतासंबंधेनविशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभावेनाव्याप्तेरभावात्। समवायेनतस्याःसा
ध्यत्वेतुसद्धेतुत्वादेवोक्तदोषाभावादित्यभिप्रायात्। यदितुसमवायेनैवतत्साध्यतागुणेगुणकर्मा १
न्यत्वविशिष्टसत्तानास्तीतिधीबलात्गुणकर्मान्यत्वविशिष्टसत्ताभावस्यगुणेसत्वेनविशि
वदूई सत्तात्वावच्छिन्नाभाववृत्तितयाव्यभिचारित्वेनतस्अभावोनप्रतियोगिव्यधिकरणइतिवा
च्यं। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरसाध्याभाववद्वृत्तित्वस्यैवव्यभिचा
रतयातस्यतत्रापिसत्वात्। अन्यथावृत्तत्वमन्तत्वोभयवानुमन्तत्वादित्यादव्यभिचारितु ग्रार
पपत्तेः। लाघवेननिर[illegible]वच्छिन्नसाध्याभावेस्यैववृत्तित्वस्यैवव्यभिचारत्वाच्चेतिसमवा ॥राम॥
१५

न० दी० का० शि० भ० क्तत्वमंगीकुर्वीत तल्लक्षणाति धानाद्विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्ये गुणः सत्तावानिति प्रतीति
प्रतीतिवत् गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तिर्विशिष्टस्यातिरिक्तत्वमेवोपेयं तेषु
१४ त्वनोक्ताव्याप्त्यतिव्याप्ती। ननु विशिष्टस्यातिरिक्तत्वेपि सत्ताधिकरणतायाः विशिष्टसत्ताधिकरणतायाश्चै
क्ये न गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तिवारणाय विशिष्टस्यातिरिक्तत्वांगीकर्त्रा
एवं पि विशिष्टनिरूपिताधिकरणताया अनतिरिक्तत्वमवश्यमंगीकार्यं एवं च विशिष्टस्यातिरिक्तत्वेपि नेदं दूषणमिति दोष क५ किं
स्तदवस्थ एवेत्यतः विशिष्टस्यानतिरिक्तत्वेपि लक्षणमाह। यद्विशिष्टेति। यद्विशिष्टसमानाधिकरणाः यावंतः
साध्यसमानाधिकरणात्यंताभावप्रतियोगितावच्छेदकत्वं वेति पाठः यत्पदं हेतुतावच्छेदकपरं। तेन एतादृशलक्षणकरणेन। अतिरि
दर क्तत्वे पीति नाविशिष्टस्यातिरिक्तत्वमंगीकृत्य पूर्वलक्षणं सूचितं। केचित्तु विशिष्टस्यानतिरिक्तत्वे पूर्वोक्तातिव्याप्ति व्याप्यतिव्याप्ति
व्याप्तीरित्यत आह। यद्विशिष्टेति। तथा च पूर्वलक्षणे हेतुतावच्छेदकनिवेशः इति भाव इत्याहुः। तदसत्। तद्दलं वैय
र्थ्यापत्तेरित्यत आह। यद्विशिष्टेति। तथा च पूर्वलक्षणे हेतुतावच्छेदकनिवेशः इति भाव इत्याहुः। तदसत्। तद्दलं वैय ॥रामः॥
निनलक्षणांतरत्वकथनस्यासंगतत्वापत्तेः। तस्मान्मदुक्तरीतिरेवात्रानुसंधेया। न चात्रापि गुणकर्मान्य १४

अपि२ एवं२